**श्रीसोमनाथसंस्कृतयुनिवर्सिटी,वेरावलम्**

**सत्रान्तपरीक्षा – एप्रिल – २०१९**

**कक्षा –** शास्त्रितृतीयवर्षम् (SEM-6) **प्रश्नपत्रम् –** ०७ **गुणाः -** ७०

**विषयः** - साहित्यम् **कोड – C.**E. 3.6.1.1. **समयः -** ११ तः ०२

**दिनाङ्कः** - ०५/०४/२०१९ **सन्दर्भग्रन्थः –** सहित्यदर्पण:

---

**प्रथमान्वितिः (Unit-1)**

**प्रश्नः – १** निम्नेषु द्वयो: ससन्दर्भं व्याख्यां लिखत। १०

१.चित्तद्रवीभावमयो ह्लादो माधुर्यमुच्यते।
सम्भोगं करुणे विप्रलम्भे शान्तेऽधिकं क्रमात्॥

२. चित्तं वाप्नोति य: क्षिप्रं शुष्केन्धनमिवानल:।
स प्रसाद: समस्तेषु रसेषु रचनासु च॥

३. माधुर्यव्यञ्जकैर्वर्णै रचना ललितात्मिका।
अवृत्तिरल्पवृत्तिर्वा वैदर्भी रीतिरिष्यते॥

**प्रश्नः – २** **साहित्यदर्पणकारस्य परिचयं लिखित्वा साहित्यदर्पणस्य वैशिष्ट्यं लिखत।** १०

**अथवा**

**साहित्यदर्पणानुसारं गुणनिरूपणं क्रियताम्।**

**द्वितीयान्वितिः (Unit-2)**

**प्रश्नः – ३** **निम्नेषु द्वयो: ससन्दर्भं व्याख्यां लिखत।** १०

(१)व्यञ्जनं चेद्यथावस्थं सहाद्येन स्वरेण तु।
आवर्त्यतेऽन्त्ययोÁयत्वादन्त्यानुप्रास एव तत्॥

(२)साम्यं वाच्यमवैधर्म्यं वाक्यैक्य उपमा द्वयो:।

(३) विभावना विना हेतुं कार्योत्पत्तिर्यदुच्यते।
उक्तानुक्तनिमित्तत्वात् द्विधा सा परिकीर्त्तिता॥

**प्रश्नः – ४** **साहित्यदर्पणानुसारं यमकस्य निरूपणं क्रियताम्।** १०

**अथवा**

**साहित्यदर्पणानुसारम् उत्प्रेक्षायाः निरूपणं क्रियताम्।**

## तृतीयान्विति:(Unit - 3)

**प्रश्नः –५ निम्नेषु द्वयो: ससन्दर्भं व्याख्यां लिखत ।** **१०**

१) दृष्टान्तस्तु सधर्मस्य वस्तुन: प्रतिबिम्बनम् ।

२) सामान्यं वा विशेषेण विशेषस्तेन वा यदि ।
कार्यं च कारणेनेदं कार्येण च समर्थ्यते ॥
साधर्म्येणैतरेणार्थान्तरन्यासोऽष्टधा तत: ।

३) पूर्वं पूर्वं प्रति विशेषणत्वेन परं परम् ।
स्थाप्यतेऽपोह्यते वा चेत् स्यात्तदैकावली द्विधा ॥

**प्रश्नः –६ साहित्यदर्पणानुसारं प्रतिवस्तूपमालङ्कारस्य सोदाहरणं निरूपणं क्रियताम् ।** **१०**

**अथवा**

**साहित्यदर्पणानुसारं विरोधालङ्कारस्य सोदाहरणं निरूपणं क्रियताम् ।**

## अन्वितय: १ – ३ (Units 1 – 3)

**प्रश्नः –७ अधोलिखितेषु प्रश्नेषु दशानां प्रश्नानां लघूत्तराणि लिखत ।** **१०**

१) साहित्यदर्पणे कति परिच्छेदा: सन्ति ?

२) अष्टमपरिच्छेदे किं निरूपणम् ?

३) रीतिनिरूपणं कस्मिन् परिच्छेदेऽस्ति ?

४) अलङ्कारा: शब्दार्थयो: स्थिरा धर्मा अथवा अस्थिरा: ?

५) अलङ्कारा: केषामुपकारका: भवन्ति ?

६) उपमानोपमेययोरेकत्वे क: अलङ्कार: भवति ?

७) रूपकं कतिविधं भवति ?

८) उपमेयस्य उपमानत्वेन सम्भावनायां क: अलङ्कार: भवति ?

९) धन्याऽसि वैदर्भि! इत्यादिपद्ये क: अलङ्कार: अस्ति ?

१०)क्व सूर्यप्रभवो वंश: इत्यादिपद्ये क: अलङ्कार: निरूपित: ?

११) अर्थान्तरन्यास: कतिविध: ?

१२) बृहत्सहाय: कार्यान्तं ...... इत्यादिपद्ये क: अलङ्कार: अस्ति ?

१३) शब्दालङ्कारा: कस्मिन् परिच्छेदे निरूपिता: सन्ति ?

१४) अर्थालङ्कारा: कस्मिन् परिच्छेदे निरूपिता: सन्ति ?

१५) बहूनाम् अलङ्काराणां सम्मिश्रणे क: अलङ्कार: भवति ?

****************